# ॥ श्री माता अमृतानन्दमयी अष्टोत्तरशतनामावलिः ॥

### ध्यानम्

॥ ॐ अमृतेश्वर्यै नमः ॥

ॐ ध्यायामोधवलावगुण्ठनवतीं तेजोमयीं नैष्ठिकीम्
स्निग्धापाङ्गविलोकिनीं भगवतीं मन्दस्मित श्रीमुखीम्।
वात्सल्यामृतवर्षिणीं सुमधुरं सङ्कीर्तनालापिनीम्
श्यामाङ्गीं मधुसिक्तसूक्तिं अमृतानन्दात्मिकामीश्वरीम्॥

१. ॐ पूर्ण-ब्रह्म-स्वरूपिण्यै नमः।

२. ॐ सच्चिदानन्द-मूर्तये नमः।

३. ॐ आत्मारामाग्रगण्यायै नमः।

४. ॐ योग-लीनान्तरात्मने नमः।

५. ॐ अन्तर्मुख स्वभावायै नमः।

६. ॐ तुर्य-तुङ्ग-स्थलीजुषे नमः।

७. ॐ प्रभामण्दल-वीतायै नमः।

८. ॐ दुरासद-महौजसे नमः।

९. ॐ त्यक्त-दिग्वस्तु-कालादि-सर्वावच्छेद-राशये नमः।

१० . ॐ सजातीय-विजातीय-स्वीय-भेद-निराकृते नमः।

११. ॐ वाणी-बुद्धि-विमृग्यायै नमः।

१२. ॐ शश्वदव्यक्त-वर्त्मने नमः।

१३. ॐ नाम-रूपादि शून्यायै नमः।

१४. ॐ शून्य-कल्प-विभूतये नमः।

१५. ॐ षडैश्वर्य-समुद्रायै नमः।

१६. ॐ दूरीकृत-षड्रूर्मये नमः।

१७. ॐ नित्य-प्रबुद्ध-संशुद्ध-निर्मुक्तात्म-प्रभामुचे नमः।

१८. ॐ कारुण्याकुल-चित्तायै नमः।

१९. ॐ त्यक्त-योग-सुषुप्तये नमः।

२०. ॐ केरलक्ष्मावतीर्णायै नमः।

२१. ॐ मानुषस्त्री-वपुर्भृते नमः।

२२. ॐ धर्मिष्ठ-सुगुणानन्द-दमयन्ती-स्वयम्भुवे नमः।

२३. ॐ माता-पितृ-चिराचीर्ण-पुण्यपूर-फलात्मने नमः।

२४. ॐ निश्शब्द-जननीगर्भ-निर्गमाद्भुत-कर्मणे नमः।

२५. ॐ काली-श्रीकृष्ण-सङ्काश-कोमल-श्यामल-तिषे न्मः।

२६. ॐ चिरनष्ट-पुनर्लब्ध-भार्गवक्षेत्र-सम्पदे नमः।

२७. ॐ मृतप्राय-भृगुक्षेत्र-पुनरुद्धित-तेजसे नमः।

२८. ॐ सौशील्यादि-गुणाकृष्ट-जङ्गम-स्थावरालये नमः।

२९. ॐ मनुष्य-मृग-पक्ष्यादि-सर्व-संसेविताङ्घ्रये नमः।

३०. ॐ नैसर्गिक-दयातीर्थ-स्नान-क्लिन्नान्तरात्मने नम्ः।

३१. ॐ दरिद्र-जनता-हस्त-समर्पित-निजान्धसे नमः।

३२. ॐ अन्यवक्त्र-प्रभुक्तान्न-पूरित-स्वीय-कुक्षये-नमः।

३३. ॐ सम्प्राप्त-सर्व-भूतात्म-स्वात्म-सत्तानुभूतये नमः।

३४. ॐ अशिक्षित-स्वयंस्वान्त-स्फुरत्-कृष्ण-विभूतये नमः।

३५. ॐ अच्छिन्न-मधुरोदार-कृष्ण-लीलानुसन्धये नमः।

३६. ॐ नन्दात्मज मुखालोक-नित्योत्कण्ठित-चेतसे नमः।

३७. ॐ गोविन्द-विप्रयोगाधि-दाव-दग्धान्तरात्मने नमः।

३८. ॐ वियोग-शोक-सम्मूर्च्छा-मुहुः-पतित-वर्ष्मणे नमः।

३९. ॐ सारमेयादि-विहित-शुश्रूषा-लब्ध-बुद्धये नमः।

४०. ॐ प्रेमभक्ति-बलाकृष्ट-प्रादुर्भावित-शार्ङ्गिणे नमः।

४१. ॐ कृष्णालोक-महाह्लाद-ध्वस्त-शोकान्तरात्मने नमः।

४२. ॐ काञ्ची-चन्द्रक-मञ्जीर-वंशी-शोभी-स्वभू-दृशे नमः।

४३. ॐ सार्वत्रिक-हृषीकेश-सान्निध्य-लहरी-स्पृशे नमः।

४४. ॐ सुस्मेर-तनु-मुखालोक-विस्मेरोत्फुल्ल-दृष्टये नमः।

४५. ॐ तत्कान्ति-यमुना-स्पर्श-हृष्ट-रोमाङ्ग-यष्टये नमः।

४६. ॐ अप्रतीक्षित-सम्प्राप्त-देवी-रूपोपलब्धये नमः।

४७. ॐ पाणि-पद्म-स्वपद्वीणा-शोभमानाम्बिका-दृशे नमः।

४८. ॐ देवी-सद्यः-तिरोधान-ताप-व्यथित-चेतसे नमः।

४९. ॐ दीन-रोदन-निर्घोष-दीर्ण-दिक्कर्ण-वर्त्मने नमः।

५०. ॐ त्यक्तान्न-पान-निद्रादि-सर्व-दैहिक-धर्मणे नमः।

५१. ॐ कुररादि-समानीत-भक्ष्य-पोषित-वर्त्मने नमः।

५२. ॐ वीणा-निष्यन्दि-संगीत-लालित-श्रुतिनालये नमः।

५३. ॐ अपार-परमानन्द-लहरी-मग्न-चेतसे नमः।

५४. ॐ चण्डिका-भीकराकार-दर्शनालब्ध-शर्मणे नमः।

५५. ॐ शान्त-रूपामृत-झरी-पारणा-निवृतात्मने नमः।

५६. ॐ शारदा-स्मारकाशेष-स्वभाव-गुण-सम्पदे नमः।

५७. ॐ प्रतिबिम्बित-चान्द्रेय-शारदोभय-मूर्तये नमः।

५८. ॐ तन्नाटकाभिनयन-नित्य-रङ्गयितात्मने नमः।

५९. ॐ चान्द्रेय-शारदा-केलि-कल्लोलित-सुधाब्धये-नमः।

६०. ॐ उत्तेजित-भृगुक्षेत्र-दैव-चैतन्य-रंहसे नमः।

६१. ॐ भूयः प्रत्यवरुद्धार्ष-दिव्य-संस्कार-राशये नमः।

६२. ॐ अप्राकृतात्भुतानन्त-कल्याण-गुण-सिन्धवे नमः।

६३. ॐ ऐश्वर्य-वीर्य-कीर्ति-श्री-ज्ञान-वैराग्य-वेश्मने नमः।

६४. ॐ उपात्त-बालगोपाल-वेशभूषा-विभूतये नमः।

६५. ॐ स्मेर-स्निग्ध-कटाक्षायै नमः।

६६. ॐ स्वैराध्युषित-वेदये नमः।

६७. ॐ पिञ्छ-कुण्डल-मञ्जीर-वंशिका-किङ्किणी-भृते नमः।

६८. ॐ भक्त-लोकाखिलाभीष्ट-पूरण-प्रीणनेच्छवे नमः।

६९. ॐ पीठारुढ-महादेवीभाव-भास्वर-मूर्तये नमः।

७०. ॐ भूषणाम्बर-वेशश्री-दीप्यमानाङ्ग-यष्टये नमः।

७१. ॐ सुप्रसन्न-मुखाम्भोज-वराभयद-पाणये नमः।

७२. ॐ किरीट-रशना-कर्णपूर-स्वर्णपटी-भृते नमः।

७३. ॐ जिह्वा-लीढ-महारोगि-वीभत्स-व्रणित-त्वचे-नमः।

७४. ॐ त्वग्रोग-ध्वंस-निष्णात-गौराङ्गापर-मूर्तये नमः।

७५. ॐ स्तेय-हिंसा-सुरापानाद्यशेषाधर्म-विद्विषे नमः।

७६. ॐ त्याग-वैराग्य-मैत्र्यादि-सर्व-सद्वासना-पुषे नमः।

७७. ॐ पादाश्रित-मनोरूढ-दुस्संस्कार-रहोमुषे नमः।

७८. ॐ प्रेम-भक्ति-सुधासिक्त-साधु-चित्त-गुहाजुषे नमः।

७९. ॐ सुधामणि महानाम्ने नमः।

८०. ॐ सुभाषित-सुधामुचे नमः।

८१. ॐ अमृतानन्द-मय्याख्या-जनकर्ण-पुटस्पृशे नमः।

८२. ॐ दृप्त-दत्त-विरक्तायै नमः।

८३. ॐ नम्रार्पित बुभुक्षवे नमः।

८४. ॐ उत्सृष्ट-भोगि-सङ्गायै नमः।

८५. ॐ योगि-सङ्ग-रिरंसवे नमः।

८६. ॐ अभिनन्दित-दानादि-शुभ-कर्माभिवृद्धये नमः।

८७. ॐ अभिवन्दित-निश्शेष-स्थिर-जङ्गम-सृष्टये नमः।

८८. ॐ प्रोत्साहित-ब्रह्मविद्या-सम्प्रदाय-प्रवृत्तये नमः।

८९. ॐ पुनरासादित-श्रेष्ठ-तपोविपिन-वृत्तये नमः।

९०. ॐ भूयो-गुरुकुलावास-शिक्षणोत्सुक-मेधसे नमः।

९१. ॐ अनेक-नैष्ठिक-ब्रह्मचारि-निर्मातृ-वेधसे नमः।

९२. ॐ शिष्य-सङ्क्रामित-स्वीय-प्रोज्ज्वलद्-ब्रह्म-वर्चसे नमः।

९३. ॐ अन्तेवासि-जनाशेष-चेष्टा-पातित-दृष्टये नमः।

९४. ॐ मोहान्धकार-सञ्चारि-लोकानुग्राहि-रोचिषे नमः।

९५. ॐ तमः-क्लिष्ट-मनोवृष्ट-स्वप्रकाश-शुभाशिषे नमः।

९६. ॐ भक्त-शुद्धान्तरङ्गस्थ-भद्रदीप-शिखा-त्विषे नमः।

९७. ॐ सप्रीति-भुक्त-भक्तौघन्यर्पित-स्नेह-सर्पिषे नमः।

९८. ॐ शिष्य-वर्य-सभा-मध्य-ध्यान-योग-विधित्सवे नमः।

९९. ॐ शश्वल्लोक-हिताचार-मग्न-देहेन्द्रियासवे नमः।

१००. ॐ निजपुण्य-प्रदानान्य-पापादान-चिकीर्षवे नमः।

१०१. ॐ प्रस्वर्यापन-स्वीय-नरक-प्राप्ति-लिप्सवे नमः।

१०२. ॐ रथोत्सव-चलत्-कन्याकुमारी-मर्त्य-मूर्तये नमः।

१०३. ॐ विमोहार्णव-निर्मग्न-भृगुक्षेत्रो-ज्जिहीर्षवे नमः।

१०४. ॐ पुनस्सन्तानित-द्वैपायन-सत्कुल-तन्तवे नमः।

१०५. ॐ वेद-शास्त्र-पुराणेतिहास-शाश्वत-बन्धवे नमः।

१०६. ॐ भृगुक्षेत्र-समुन्मीलत्-परदैवत-तेजसे नमः।

१०७. ॐ देव्यै नमः।

१०८. ॐ प्रेमामृतानन्दमय्यै नित्यं नमो नमः

॥ ॐ अमृतेश्वर्यै नमः॥